"ज्ञानविज्ञानसम्पन्नौ राजमार्गविशारदौ ।
जुघुषाते महारङ्गे राक्षसेन दुरात्मना ॥")

राजमाषः, पुं, (माषाणां राजा श्रेष्ठत्वात् । राजदन्तादित्वात् परनिपातः ।) वर्व्वटः । बरबटी कड़ाइ इति भाषा । तत्पर्य्यायः । नीलमाषः २ कृष्णमाषः ३ कृष्णोचितः ४ । अस्य गुणाः । कफपित्तहरत्वम् । रुच्यत्वम् । वातकारित्वम् । बलदायकत्वञ्च । इति राजनिर्घण्टः ॥ सारकत्वम् । शुक्राम्लपित्तहरत्वम् । सुस्वादुत्वम् । रूक्षत्वम् । कषायत्वम् । विषदत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ अन्यच्च ।
"राजमाषो महामाषश्चपलश्च बलः स्मृतः ।
राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो रसः ।
रूक्षो वातकरो रुच्यः स्तन्यो भूरिमलप्रदः ॥"
इति भावप्रकाशः ॥ * ॥
कालविशेषे अस्याभक्ष्यत्वं यथा । नारदीये ।
"निष्पावान् राजमाषांश्च सुप्ते देवे जनार्द्दने ।
यो भक्षयति राजेन्द्र चाण्डालादधिको हि सः ॥
कार्त्तिके तु विशेषेण राजमाषांश्च वर्ज्जयेत् ।
निष्पावान् मुनिशार्द्दूल यावदाभूतनारकी ॥"
इति तिथ्यादितत्त्वम् ॥

राजमुद्गः, पुं, (मुद्गानां राजा । राजदन्तादित्वात् परनिपातः ।) मकुष्ठकः । इति हेमचन्द्रः । ४ । २४० ॥

राजयक्ष्मा, [न्] पुं, (राज्ञश्चन्द्रस्य क्षयकारको यक्ष्मा । राजा चासौ यक्ष्मा चेति वा ।) क्षयरोगः । इति हेमचन्द्रः ॥ अस्य पर्य्यायनिदानौषधादयो यक्ष्मशब्दे द्रष्टव्याः ॥ * ॥ (असौ हि सर्व्वरोगाणामाकरः । यथा, माघे । २ । ९६ ।
"मावेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥"
"तथाह वाग्भटः ।
अनेकरोगानुगतो बहुरोगपुरःसरः ।
राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥
नक्षत्राणां द्विजानाञ्च राजोऽभूत् यदयं पुरा ।
यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥"
इति तट्टीकायां मल्लिनाथः ॥)
महापातकजचिह्नमध्ययम् । यथा, विष्णुः । अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति । कुष्ठातिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा । इत्यादि कूर्म्मपुराणम् ॥
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥"
महारोगिणः पापरोगाष्टकान्यतमरोगवतः ।
ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः । इति शुद्धितत्त्वम् ॥ * ॥
तस्योत्पत्तिरूपस्थानानि यथा,—
"अथ कोपवतस्तस्य दक्षस्य सुमहात्मनः ।
निश्चक्राम तदा यक्ष्मा नासिकाग्रादिभीषणः ॥
दंष्ट्राकरालवदनः कृष्णाङ्गारसमप्रभः ।
अतिदीर्घः स्वल्पकेशः कृशो धमनिसन्ततः ॥
अधोमुखो दण्डहस्तः कासं विश्रभ्य सन्ततम् ।
कुर्व्वाणो निम्ननेत्रश्च योषासम्भोगलोलुपः ॥
स चोवाच तदा दक्षं कुत्र स्थास्याम्यहं मुने ।
किंवा चाहं करिष्यामि तन्मे वद महामते ॥
ततो दक्षस्तु तं प्राह सोमं यातु द्रुतं भवान् ।
सोममत्तु भवान्नित्यं सोमे त्वं तिष्ठ स्वेच्छया ॥
मार्कण्डेय उवाच ।
इति तस्य वचः श्रुत्वा दक्षस्याथ महात्मनः ।
शनैः शनैस्ततः सोममाससाद स च द्रुतम् ॥
आसाद्य स तदा सोमं वल्मीकं पन्नगो यथा ।
प्रविवेशेन्दुहृदये छिद्रं प्राप्य महागदः ॥
तस्मिन् प्रविष्टे हृदये दारुणे राजयक्ष्मणि ।
शुशोच चन्द्रस्तन्द्रीश्च विषमां प्राप्तवांस्ततः ॥
उत्पन्न प्रथमं यस्माल्लीनो राजन्यसौ गदः ।
राजयक्ष्मेति लोकेऽस्मिंस्तस्य ख्यातिरभूत्
द्विजाः ॥
ततस्तेनाभिभूतश्च यक्ष्मणा रोहिणीपतिः ।
क्षयं जगामानुदिनं ग्रीष्मे शुष्का नदी यथा ॥
तथा चन्द्रे क्षीयमाणे सर्व्वौषध्यः क्षयं गताः ।
क्षयं जातास्वोषधीषु न यज्ञः संप्रवर्त्तते ॥
यज्ञाभावात्तु देवानामन्नं सर्व्वं क्षयं गतम् ।
पर्ज्जन्याश्च ततो नष्टास्ततो वृष्टिर्न चाभवत् ।
वृष्ट्यभावे तु लोकानामाहारो क्षीणताङ्गतः ॥
दुर्भिक्षव्यसनोपेते सर्व्वलोके द्विजोत्तमाः ।
दानधर्म्मादिकं किञ्चिन्न लोकेषु प्रवर्त्तते ॥
सत्त्वहीनाः प्रजाः सर्व्वा लोभेनोपहतेन्द्रियाः ।
पापमेव तदा चक्रुर्न धर्म्मरक्षयस्तथा ॥
एतद्दृष्ट्वा तदा भावं दिक्पालाः सपुरन्दराः ।
जग्मुः क्षोभं परं देवाः सागराश्च ग्रहास्तथा ॥
ततो दृष्ट्वा जगत् सर्व्वं व्याकुलं दस्युपीड़ितम् ।
ब्रह्माणमगमन्देवाः सर्व्वे शक्रपुरोगमाः ॥
उपसङ्गम्य लोकेशं स्रष्टारं जगतां पतिम् ।
प्रणम्याथ यथायोग्यमुपविष्टास्ततः सुराः ॥
तान् म्लानवदनान् वीक्ष्य ब्रह्मा लोकपितामहः ।
अभिभूतान् परेणेव हृतस्वविषयानिव ।
पप्रच्छ सुसुखीकृत्य गुरुमिन्द्रं हुताशनम् ॥
ब्रह्मोवाच ।
स्वागतं भोः सुरगणाः किमर्थं यूयमागताः ।
दुःखोपहतदेहांश्च युष्मान् म्लानांश्च लक्षये
निराधारान् निरातङ्कान् सुरान् सर्व्वांस्तु
कामगान् ।
कृत्वा स्वविषये न्यस्तान् कथं पश्यामि दुःखितान् ॥
यद्भूतं दुःखबीजं युष्मान् वा यस्तु बाधते ।
तत् कथ्यतामशेषेण सिद्धिं चाप्यवधार्य्यताम् ॥
मार्कण्डेय उवाच ।
ततो वृहस्पदा जीवः कृष्णवर्त्मा च लोककृत् ।
उवाचात्मभुवे तस्मै सुराणां दुःखकारणम् ॥
शृणु सर्व्वं जगत्कर्त्तस्त्वां येन वयमागताः ।
यदस्माकं दुःखबीजं यतो म्लानश्रियो वयम् ।
न कश्चित् संप्रवर्त्तन्ते यज्ञा लोकपितामह ॥
देवा ऊचुः ।
निराधारा निरातङ्काः प्रजाः सर्व्वाः क्षयं
गताः ।
न च दानादिधर्म्मांश्च न तपांसि क्षितौ क्वचित् ॥
नैव वर्षति पर्ज्जन्यः क्षीणतोयाभवत् क्षितिः ।
क्षीणाः सर्व्वास्तथौषध्यः ग्रस्ता लोकाः समाकुलाः ॥
दस्युभिः पीड़िता विप्रा वेदवादान्न कुर्व्वते ।
अन्नवेकल्यमासाद्य म्रियन्ते बहवः प्रजाः ॥
क्षीणेषु यज्ञभागेषु भोगहीनास्तथा वयम् ।
दुर्व्वलाश्च श्रिया हीना नैव शान्तिं लभामहे ॥
रोहिण्या मन्दिरे चन्द्रो वक्रगत्या चिरं स्थितः ।
हृषराशौ स च क्षीणो ज्योत्स्नाहीनश्च वर्त्तते ॥
यद्देवान्निष्यते देवैश्चन्द्रो नेषां पुरःसरः ।
कदाचिदपि देवानां समाजे वा भवद्विधे ॥
कदाचिद्रोहिणीं त्यक्त्वा नैव क्व च न गच्छति ।
यद्यन्यः कोऽपि न भवेत्तदा चन्द्रो बहिर्भवेत् ।
दृश्यते स कलाहीनः कलामात्रावशेषितः ॥
इति सर्व्वत्र लोकेश दृष्टः कर्म्मविपर्य्ययः ।
तं दृष्ट्वा कान्दिशीकास्तु वयं त्वां शरणं गताः ॥
पातालादुत्पाद्योत्थाय कालकञ्जादयोऽसुराः ।
नाऽस्मान् लोकेषु बाधन्ते तावन्नः पाहि साध्वसात् ॥
स्वयं प्रवर्त्तते कस्माज्जगतां वा व्यतिक्रमः ।
न जानीमस्तु तत् सर्व्वं विप्लवे चापि कारणम् ॥
मार्कण्डेय उवाच ।
एतत् सुराणां वचनं दिव्यदर्शी पितामहः ।
श्रुत्वा क्षणमभिध्याय निजगाद सुरोत्तमान् ॥
ब्रह्मोवाच ।
शृण्वन्तु देवताः सर्व्वा यदर्थं लोकविप्लवः ।
प्रवर्त्ततेऽधुना येन शान्तिस्तस्य भविष्यति ॥
सोमो दाक्षायणीः कन्याः सप्तविंशतिसंख्यया ।
अश्विन्याद्या वरवधूर्भार्य्यार्थे परिणीतवान् ॥
परिणीय स ताः सर्व्वा रोहिण्यां सततं विधुः ।
प्रवर्त्तितानुरागेण न सर्व्वासु प्रवर्त्तते ॥
अश्विन्याद्यास्ततः सर्व्वा दौर्भाग्यज्वरपीड़िताः ।
षड्विंशतिर्वरारोहाः पितरं प्रस्थिताः स्वकम् ॥
प्रवर्त्तते निशानाथो रोहिण्यां रागतो यथा ।
तथा न तासु भजते तद्दक्षाय न्यवेदयन् ॥
अतो दक्षो महाबुद्धिः साम्ना संस्तूय विट्पतिम् ।
बहुसूनृतमाभाष्य पुत्त्रार्थेऽनुरुरोध तम् ।
अनुरुद्धो यथाकामं दक्षेण सुमहात्मना ।
समं प्रवर्त्तितं तासु समयं कृतवान् विधुः ॥
समम‌ङ्गीकृते भावं तासु कर्त्तुं हिमांशुना ।
स्वं जगाम ततः स्थानं दक्षोऽपि मुनिसत्तमः ॥
गते दक्षे मुनिश्रेष्ठे वैषम्यं तासु चन्द्रमाः ।
जहौ न भावं ताः शश्वत् कुपिताः पितरं
गताः ॥
ततो दक्षः पुनश्चन्द्रमनुरुध्य सुतान्तरे ।